M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1232

Title: Aditya Hrdaya Stotra

1232

Incomplete

:	: Āditya Hṛdaya Stōtra	:	Title
:	:	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
1232 :	:	:	Remarks

ॐनमोभगवतेआदित्यायेति कीलकं ३

श्रीसूर्यनारायणोपस्ताना

श्रीस्यात्रिभुवनेश्वरोदेवता अनुष्टुप् जैंगांतीछंदः हरितह
यरथंरिवाकरं घृणिरितिबीजं ॐ नमोभगवत्तोजातवेदसे अग्निवैश्वानराय
नमइतीशक्तिः ॐ अंशुमानितिकीलकं ॐ अग्निगर्भदेव
ताइतीमंत्रः ॐ नमोभगवतेतुभ्यं आदित्यायनमोनमः श्री
सूर्यनारायणप्रीत्यर्थे जपेविनियोगः अथषडंगन्यासः
ॐ ह्रां अंगुष्ठाभ्यांनमः ॐ ह्रीं तर्जनीभ्यांनमः ॐ ह्रूं मध्य
माभ्यांनमः ॐ ह्रैं अनामिकाभ्यांनमः ॐ ह्रौं कनिष्ठिका
भ्यांनमः ॐ ह्रः करतलकरपृष्ठाभ्यांनमः ॥ एवंहृदया
दिन्यासः अथध्यानं भास्वद्रत्नाढ्यमौलिस्फुरदमन

३ मत्तरुचीरं जितं स्वाभिरामो भास्यं तेदिव्यनेजः करकमल
धृत्तस्वर्णवर्णप्रभाभिः विश्वाकाशाकांकाशग्रहपति शि
खरे भा तिय ऋयोदयाद्यो सर्वानंदप्रदाता हरिहरनमितः
पातु मां विश्वचक्षुः १ मायाबीजं दलाष्टाग्रे यंत्रमुखास्ये
दिति आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरं मार्तंडं तप
नं चेति दले ष्वष्टसु योजयेत् २ दीप्ता सूक्ष्मा जया भद्रा
विभूति विमला तथा अमोघा विद्युता चेति मध्ये श्री सर्वतो
मुखी ३ ॐ सर्वज्ञः सर्वगश्चैव सर्वकारणदेवता सर्वेशं
सर्वहृदयं नमामि सर्वसाक्षिकं ९ सर्वात्मा सर्वकर्ता च

विन्यसेन्मूर्ध्नि ४

सृष्टिजीवनपालकः हितः स्वर्गापवर्गश्च भास्करेश नमो
स्तुते १० इति प्रार्थना नमोनमस्तेस्तु सदा विभावसो सर्वा
त्मने सप्तसहाय भानवे अनंतशक्ति मणि भूषणेन दरस्व भु
क्तिं मम मुक्तिमव्ययं ११ अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं
न्यसेत् विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरं १२ ना
सिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् पर्जन्यं मो
ष्ठयोश्चैव तीक्ष्णं जिह्वातले न्यसेत् १३ सुवर्णरेतसं कंठे
स्कंधयोस्तिग्मतेजसं बाह्वोस्तु पूषणं चैव मित्रं वै पृ
ष्ठतो न्यसेत् वरुणं दक्षिणे हस्ते त्वष्टारं वामतः करे ह

हना

४ हस्तौ तु भक्करः पातु हृदयं पातु भानुमान् १५ उदरे तु यमं विं
द्यादादित्यं नाभिमंडले कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्य
सेत् १६ जान्वोस्तु गोपतिं न्यस्य सवितारं तु जंघयोः गुल्फे
योश्च विवस्वंतं पादयोश्च दिवाकरं १७ बाह्यतस्तु तमो
ध्वंसं भगमभ्यंतरे न्यसेत् सर्वांगेषु सहस्त्रांशु दिग्विदिक्षु
भयं न्यसेत् १८ इति दिग्बंधः एष आदित्य विन्यासो देवा
नाम पि दुर्लभः इमं भक्त्या न्यसेत्पार्थ स याति परमां गतिं १९
काम क्रोध कृतात्पापान्मुच्यते नात्र संशयः सर्पादपि भ
यं नैव संग्रामेषु पथिष्वपि २० रिपुसंघट्ट कालेषु तथा चौ
र समागमे त्रिसंध्यं जपतो न्यासं महापातक नाशनं २१

विस्फोटक समुत्पन्नं तीव्र ज्वर समुद्भवं शिरोरोगं नेत्ररो
गं सर्वव्याधिं विनाशयेत् २२ कुष्ठव्याधिस्तथा दद्रु रोगाश्च
विविधाश्च ये जपमानस्य नश्यंति शृणु भक्त्यास्तदर्जुन २३
आदित्यं मंत्र संयुक्तं आदित्यं भुवनेश्वरं आदित्या नापरो देवो देवं
आदित्यं परमेश्वरः २४ आदित्यमर्चयेद् ब्रह्मा आदित्यमर्च
येच्छिवः यदादित्यमयं तेजो मम तेजस्तदर्जुन २५ आदित्य
~~मंत्र संयुक्तं आदित्यो भुवनेश्वरः~~ आदित्यं ये प्रपश्यंति मा
पश्यंति न संशयः २६ ~~त्रिसंध्यं जपतो न्यासं महापातक~~
स नाशनं नैव पश्यंति दारिद्र्यं जन्मजन्मनि चार्जुन २७
त्रिसंध्यं जपमानस्तु स्मरेत्तथा नु मानरः २

 यइदं धारयेन्नित्यम् आत्मनाय प्रयच्छति
स्या

५ एततकथितं पार्थे आदित्यहृदयं मया मुच्यते सर्वपापे
भ्यो सूर्यलोके महीयते २८ ॐ नमो भगवते तुभ्यं आदित्या
यनमोनमः आदित्यः सविता सूर्यः खगः पूषा गभस्ति
मान् २९ सुवर्णस्फटिको भानुः स्फुरितो विश्वतापनः
रविर्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ३० हिरण्य
गर्भस्त्रिशिरास्तपनो भास्करो रविः मार्तंडो गोपतिः श्री
मान् कृतज्ञश्च प्रतापवान् ३१ तमिस्रहा भगो हंसो ना
सत्यश्च तमोनुदः शुद्धो विरोचनः केशी सहस्रांशुर्महा
प्रभुः ३२ विवस्वान्पूषणो मृत्युर्मिहिरो जामदग्नी जित् घ
न्य

धर्मरश्मिः पतंगश्च शरण्यो मित्रहा तपाः ३३ दुर्विज्ञेयग
र: तिः शुक्लतेजा रश्मि महायशाः वंशभुश्च वंगारः सौम्यो हव्य
कव्यप्रदायकः ३४ अंशुमानुत्तमो देवो ऋग्यजुः साम ए
व च हरिश्चोत्तमो हारः सत्यसप्तिर्मरीचीमान् ३५ अग्नी
गर्भो दितेः पुत्रः शंभुस्तिमिरनाशनः पूषा विश्वंभरो मित्रः
सुवर्णः सुप्रतापवान् ३६ आतापि मंडली भास्वान्तपनः स
र्वतापनः कृतविश्वो महातेजाः सर्वरत्नमयोद्भवः ३७ अ
दिवा क्षरश्चाक्षरश्चैव प्रभाकरविभाकरो. श्चंद्रश्चंद्रांगारः सौ
म्योहव्यकव्यप्रदायकः ३८ अंगारकोंगरोगहिरकोंग.
रुणो

श्यांगवर्द्धनः बुधोबुद्धिमनोबुद्धिर्बुधात्माबुद्धिवर्द्धनः॥ ६
॥३९॥ वृहद्भानुर्वृहद्भासोवृहद्धामावृहस्पतिः शुक्ल तौ०
स्त्वंशुक्लरेताश्चशुक्लांगः शुक्लभूषणः ४० शनिमान्धुनि
रूपस्त्वंशनैर्गच्छसिसर्वदा अनादिरादिरादित्यस्तेजोराशिर्म
हायशाः ४१ आनादिरादिरूपस्त्वमादित्योदिक्पतिर्यमः भा
नुमान्भानुरूपस्त्वंस्वर्भानुर्भानुदीप्तिमान् ४२ धूमकेतुर्महा
केतुः सर्वकेतुरनुत्तमः तिमिरावरणः शंभुःस्रष्टामार्तंडएवच ४३
नमः पूर्वायगिरयेपश्चिमायनमोनमः नमोत्तरायगिरयेदक्षि
णायनमोनमः ४४ नमोनमः सहस्रांशुरादित्यायनमोनमः ४५

नमः कमलहस्तायप्रभाकरनमोनमः ५

नमः पद्मप्रबोधायनमस्तेद्वादशात्मने ४५ नमोविश्वप्र
बोधायनमोभ्राजिष्णुजिष्णवे ४६ ज्योतिषेचनमस्तुभ्यंज्ञा
नार्कायनमोनमः प्रहित्यायप्रगल्भाययुगांतायनमोनमः
नमस्तेहोतृपतयेपृथिवीपतयेनमोनमः ४७ नमोंकारव
षट्कारसर्वयज्ञनमोस्तुते ऋग्वेदादियजुर्वेदसामवेदनमो
स्तुते ४८ नमोहाटकवर्णायभास्करायनमोनमः जयाजय
भद्रायहरिदश्वायतेनमः ४९ दिव्यायदिव्यरूपायग्रहाणां
पतयेनमः नमस्तेशुचयेनित्यंसर्वकुरुकुलात्मने ५०
नमस्त्रैलोक्यनाथायभूतानांपतयेनमः नमःकैवल्यना
नमस्तेशुचयेनित्यंसर्वकुरुकुलात्मने नमोविकल्पनाशायनम
स्तेदिव्यचक्षुषे

आदित्य अयुतानवलक्षाणिसहस्त्राणिचसप्ततिः यावत् हृदय घटिकमात्रेणतावच्चरतिभास्करः ४

७ थाय नमस्ते दिव्यचक्षुषे ५१ त्वंज्योतिस्त्वंद्युतिर्ब्रह्मात्वं ७
विष्णुस्त्वंप्रजापतिः त्वमेवरुद्रोरुद्रात्मा वायुरग्निस्त्वमेव
च ५२ योजनानांसहस्त्रेद्वेद्वेशतेद्वेचयोजने एकेननिमि
षार्द्धेनक्रममाणनमोस्तुते ५३ अग्रतस्तेनमस्तुभ्यंपृष्ठ
तश्चनमोस्तुते पार्श्वतश्चनमस्तुभ्यं नमस्तेश्चास्तुसर्वदा ५४ सर्व
नमःसुरारिहंत्रेच सोमसूर्याग्निचक्षुषे नमोदिव्याय व्यो
मायसर्वतंत्रमयायच ५५ नमोवेदांतवेद्याय सर्वकर्मा
दिसाक्षिणे नमोहरितवर्णाय सुवर्णायनमोनमः ५६ ७
अरुणोमाघमासेतुसूर्योवैफाल्गुणेतथा चैत्रेमासेतुवे
दांगोभानुर्वैशाखतापनः ५७ ज्येष्ठमासेतपेदिंद्रआ

६

षाढेतपतेरविः गभस्तिःश्रावणेमासेयेमोभाद्रपदेतथा ५८
सुवर्णरेताद्विषेयुंजिकार्तिकेच दिवाकरः मार्गशिर्षेतपेन्मि
त्रः पौषेविष्णुः सनातनः ५९ पुरुषस्त्वधिकेमासे मासा
धिक्येषुकल्प्यते इत्येतेद्वादशादित्याःकाश्यपेयाःप्रकीर्ति
ताः६० उग्ररूपामहात्मानस्तपंति विश्वरूपिणः धर्मार्थ
काममोक्षाणांप्रस्फुटाहेतवोनृप ६१ सर्वपापहरा[redacted]व राश्चैव
सायेःप्र आदि[redacted]म् एकधाद्दशधाचैवशतधाचसहस्त्रधा ६२
जिताः३ तपंतेविश्वरूपेणसृजंतीसंहरंतिच एषविष्णुःशिवश्चै
वप्रजापतिः ६३ महेंद्रश्चैवकालश्चयमोवरुणएवच
ब्रह्मानैव

९ नक्षत्रः ग्रहताराणां अधिपो विश्वतापनः ६४ वायुरग्नि ९
र्धनाध्यक्षो भूतकर्तास्वयंप्रभुः एषदेवो हि देवानां सर्वमा
प्यायते जगत् ६५ एषकर्ता हि भूतानां संहर्तारक्षकस्तथा।
एषलोकानुलोकाश्च सप्तद्वीपाश्च सागराः ६६ एषपाता
लसप्तस्थो दैत्यदानवराक्षसाः एषधाता विधाता च बीजं क्षे
त्रंपरागतिः ६७ एषएवप्रजानित्यं संवर्धयति रश्मिभिः
एषयज्ञः स्वधास्वाहा ह्रींश्रींश्चपुरुषोत्तमः ६८ एषभू सर्वदेवा
तात्मको देवो सूक्ष्मोव्यक्तः सनातनः ईश्वरः सर्वभूतानां
परमेष्ठी प्रजापतिः ६९ कालात्मा सर्वभूतात्मा वेदात्मा

पान २

विश्वतोमुखः जन्ममृत्युजराव्याधिसंसारभयनाशनः ७०
व्य दारिद्र्यव्यसनध्वंसी श्रीमान्देवो दिवाकरः कीर्तनीयो विवस्वां
श्च मार्तंडो भास्करो रविः ७१ लोकप्रकाशकश्चैव लोकचक्षुर्म
हेश्वरः लोकसाक्षी त्रिलोकेशः कर्ताहर्तातमिस्रहा ७२ त
पनः पावकश्चैव शुचिः सप्ताश्ववाहनः गभस्तिहस्तोब्रह्मा स्तो
च ह्मा सर्वदेवनमस्कृतः ७३ आयुरारोग्यमैश्वर्यं नरवर्यैः स्वयमं
दिर्यस्य प्रसादात्संतुष्टिरादित्यहृदयं जपेत् ७४ इत्येतैर्नाम
र्थआ भिः पार्थ आदित्यं स्तौति नित्यशः प्रातरुत्थाय कौंतेय तस्य रो
गभयं नहि ७५ पातकान्मुच्यते पार्थ व्याधिभ्यश्च न संशयः ९
एकसंध्यं द्विसंध्यं वा सर्वपापैः प्रमुच्यते ७६ त्रिसंध्यं जपमान

यदज्ञात्कुरुते तज्ज्ञात्वा प्रतिमुच्यते

१ स्तु पश्येच्च परमं पदं यदज्ञात्कुरुते पापं नरस्तत्प्रतिमुच्यते
दद्रुस्फोटककुष्ठानि मंडलानि विषूचिका: ७८ सर्वव्याधि
महारोग भूतबाधास्तथैव च डाकिनी शाकिनी चैव महारोग
येचान्ये भयंकुत: ७९ संचान्ने दुष्टरोगाश्च आतिसारज्वरादिक:
(विविधाश्च दुष्टदु:स्वा क्षयं ते स्मरणादपि) ८० जपमानस्य
नश्यंति जीवेच्च शरदां शतं सवत्सरेण मरणं यदा तस्य ध्रुवं
भवेत् ८१ नाविर्भूत पश्यति छाया महोरात्रं धनंजय: यास्त्वि
दं पठते भक्त्या भानोर्वारे महात्मन: ८२ प्रात: स्नाने हुते पा
र्थ एकाग्रकृतमानस: सुवर्णचक्षुर्भवति न्चांधस्तु प्रजायते ८३
पुत्रवान्धनसंपन्नो जायते चारुज: सुश्रीर्यशो विलभते नि

त्यं न च स्वर्गान्निवर्तते ८४ सर्वसिद्धिमवाप्नोति सर्वत्र विज)
यी भवेत्) आदित्यहृदयं पुण्यं सूर्यनाम विभूषितं ८५ श्रुत्वा
च निखिलं पार्थ सर्वपापै: प्रमुच्यते अत: परतरं नास्ति सिद्धि
कामस्य पांडव: ८६ एतज्जपस्व कौंतेय येन श्रेयो[illegible]वा[illegible]
प्स्यसि आदित्यहृदयं नित्यं य: पठेत्सुसमाहित: ८७ स्त्रैणुपान्मु
च्यते पापात्कृतघ्नो विश्वघातक: गोघ्न: सुरापो वा दुर्भोजी दु:
प्रतिग्रहा ८८ पातकानि च सर्वाणि दह्यते नात्र संशय: यइ
दं शृणुयान्नित्यं जपेद्वापि समाहित: ८९ सर्वपाप विशुद्धात्मा
सूर्यलोके महीयते अपुत्रो लभते पुत्रान् निर्धनो धनमाप्नुयात् ९०
कुरोगी मुच्यते रोगात् भक्त्या य: पठते सदा यस्त्वादित्य दिने पा

सर्वर्षि

ज्वरादि सारका द्य:

प्य

स्त्रैणादा

गोघ्न

वन.

ॐ ह्रिमालीस्वाहा ॐ ह्रिमालीढः स्वाहा ॐ निलीढः स्वाहा

थैनाभिमात्रे जले स्थितः ९१ उदयाचलमारूढं भास्करं प्रण
१० नास्थितं जपते मानवो भक्त्या शृणुयाद्वापि भक्तितः ९२ सया १०
तिपरमं स्थानं यत्र देवो दिवाकरः अमित्रदमनीं पीडां यदा कर्त्तुं
समारभेत् ९३ तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांशुभिः आ
क्रम्य वामपादेन आदित्यहृदयं जपेत् ९४ एतन्मंत्रसमाहृतं
सर्वसिद्धिकरं परं ॐ ह्रीं ह्रिमालिढ स्वाहा इति मंत्रः त्रिभि
श्च रोगी भवति ज्वरी भवती पंचभिः जपैस्तु सप्तभिः पार्थ राक्षसीं
तनुमाविशेत् ९५ राक्षसेनाभिभूतस्य विकारांछृणु पांडव।
गायते नृत्यते नग्नं आस्फोटयति धावति ९६ शिवारुतं च कु
रुते हसते क्रंदते पुनः एवं संपिड्यते पार्थ यद्यपी स्यान्महेश्व

दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः ५

रः ९७ किं पुनर्मानुषः कश्चिच्छौचाचारविवर्जितः पीडि
तस्य न संदेहो ज्वरी भवति दारुणः ९८ यदा चानुग्रहं तस्य कर्त्तु
मिच्छेच्छुभंकरं तदा सलिलमादाय जपेन्मंत्रमिमं बुधः ९९ ॐ
नमो भगवते तस्मै आदित्याय नमो नमः जयाय जय भद्राय ह
रिदश्वाय ते नमः १०० स्नापयेत्तेन मंत्रेण शुभं भवति नान्यथा
हि आन्यथा चैव भवेद्दोषो नश्यते नात्र संशयः १ स्तुवंते निखिलं स्तो ओम्
त्रंपूजां चैव निबोध मे उपलिप्ते शुचौ देशे नियतो वाग्यतः शुचिः
२ वृत्तं वा चतुरस्रं वा लिखेद्भूमौ लिखेच्छुचिः त्रिधा तत्र लिखेत्प
द्ममष्टपत्रं सकर्णिकं ३ अष्टपत्रं लिखेत्तस्मिं लिप्तगोमयमंडलं
पूर्वपत्रे लिखेत्सूर्यं आग्नेय्यां तु रविं न्यसेत् ४ याम्यां चैव विवस्वं
तं नैरृत्यां तु भगं न्यसेत् वारुणे वरुणं चैव वायव्यां मित्र
मंडलं गोमयेन तु कृत्वा तत्रालिखेत्पद्ममष्टपत्रं सकर्णिकं

कच ९ आदित्यस्युत्तरे पत्रे ईशान्यां विद्युमेव च मध्ये तु भास्करं शौ न्यस्य
११ के कमेणैवं समर्चयेत् ७ अहनामसुतपच्चांबाधुन्विसः सदा ११
प्रवक्ष्या हेयत् अनः परमवक्ष्यामि सिद्धिकामस्य पांडव ८ महातेजस्
मि घं मुहूर्तं प्रणमेत्सहस्तांजलिः सकेसराणिपद्मानि करविराणि चा
नि र्जुन ९ तिलतंडुल यवकुशोर्ग्रधोदकेन चरक्तचंदन मिश्राणि
कृत्वा वैताम्रभाजने १० धृत्वा शिरसी तत्पात्रं जानुभ्यां धरणी
तले मंत्रपूतं गुडाकेश अर्घ्यं दद्यात् भक्तये ११ सायुधं सरथं चै
व सूर्यमावाहयाम्यहं स्वागतो भव सुप्रतिष्ठितो भव संनिधो भ
व संनिहितो भव संमुखो भव इती प्रार्थना स्कुर्यात्वाहयेत्सू
र्यं भुक्तिमुक्तिं लभेन्नरः १२ ॐ श्रीं विद्यां कि लि किलि कटुकेष्ट
सर्वार्थसाधय स्वाहा ॐ श्रीं ह्रीं हूं हंसः सूर्यायनमः स्वाहा १३
ना
ह्रां ह्रीं हूं

ॐ श्रीं ह्रां ह्रीं हुं हैं ह्रौं हः सूर्यमूर्तये स्वाहा ॐ श्रीं ह्रीं खं
खः लोकाय सूर्यमूर्तये स्वाहा १४ ॐ हूं मार्तंडाय स्वाहा न ॐ
मोस्तु सूर्याय सहस्रभानवे नमोस्तु वैश्वानर जातवेदसे १५
गृह त्वमेवार्घ्यं प्रतिगृह्ण देवदेवाधिदेवाय नमो नमस्ते १६ गृहाणाय
ॐ नमो भगवते तुभ्यं नमस्ते जातवेदसे दत्तमर्घ्यं मया भानो त्वं
गृहाण नमोस्तुते १७ एहि सूर्य सहस्रांशो तेजोराशे जग
त्पते अनुकंपय मां भक्त्या गृहाणार्घ्यं नमोस्तुते १८ नमो भा दिवाकर
नवे जित वैश्वानर जातवेदसे ममेदमर्घ्यं गृह्ण त्वं देवदेव नमो
स्तुते १९ सर्वदेवाधिदेवाय आधि व्याधि विनाशनः इदं गृ
हाण मे देव सर्वव्याधि विनश्यति २० नमः सूर्याय शांताय
सर्वरोगनिवारिणे मम ऐश्वर्य फलं दत्त्वा प्रसीद परमेश्वरः २१

ॐ आदित्याय नमः ॐ शिवाय नमः

१२ ॐ नमो भगवते श्रीसूर्याय स्वाहा ॐ शिवाय स्वाहा ॐ स
र्वात्मने सूर्याय नमः स्वाहा २२ ॐ अक्षयतेजसे नमः स्वाहा १२
सर्वसंकटहारिणे शत्रुनाशाय नाशाय सर्वलोकेषु विश्वात्मा
सर्वात्मा सर्वदर्शकः २३ ॐ नमो भगवते मार्तंड कुष्टरोगा
न्विखंडय आयुरारोग्यमैश्वर्यं देहि देव नमोस्तुते २४ इ
त्यर्घ्यमंत्रः ॐ नमो भगवते तुभ्यं आदित्याय नमो नमः ॐ
अक्षयतेजसे नमः २५ ॐ सूर्याय नमः ॐ विश्वमूर्तये नमः
आदित्यं च शिवं विद्यात् शिवमादित्यरूपिणं उभयोरंतरं नास्ति आदित्य
स्याशिव स्यच सिद्धिकामस्य पांडव २६ एतद्विद्यामहं श्रोतुं पुरुषो वै दिवा
करः २७ उदयो ब्रह्मणो रूपं माध्यान्हे तु महेश्वरः २७ आ
स्तमाने स्वयं विष्णुस्त्रिमूर्तिस्तु दिवाकरः ॐ नमो भगवते

तुभ्यं नमो भगवते तुभ्यं नमस्ते जातवेदसे दत्तमर्घ्यं
मया भक्त्या गृहाण हृत्वा नमोस्तुते
म गृह
तुभ्यं विष्णवे ब्रह्मविष्णवे २२ ममेदर्घ्यं प्रतिगृह्ण देवदेवाधिदेवाय"
देवाय नमो नमस्ते श्रीसूर्याय सोमाय सपत्निकाय श्रीसूर्यनभा
येशाय मर्घ्यं २३ हिमघ्नाय तमोघ्नाय रक्षोघ्नाय नमः रोग
हृत्तघ्नाय [illegible] तस्मै सूर्यात्मने नमः २४ जयो जयश्च
विजयो जितप्राणो जितश्रमः तमोजय जितक्रोधो वाजि
नः सर्वकीर्तिनः २५ हरितहयरथं दिवाकरं कनकमयांबु
नव
जरेणु पिंजरं प्रतिदिनमुदयेन वं शरणमुपैमि हिरण्यरेत
न सं २६ नत्वा व्यालभ्यबाधंते न व्याधिभ्यो भयं भवेत् न नागे
भ्यो भयं चैव न च भूतभयं क्वचित् २७ अग्निशत्रुभयं नास्ति
पार्थिवेभ्यस्तथैव च दुर्गतिं तरते घोरां प्रजां च लभते परः
पुत्रांश्च

१३ नं २८ सिद्धिकामो लभेत् सिद्धिं कन्याकामस्तु कन्यकां ए १३
वं स्तौति स्वकौंतेय भक्तियुक्तेन चेतसा २९ अश्वमेधसह
स्रस्य वाजपेयशतस्य च कन्याकोटिसहस्रस्य दत्तस्य फलं
माप्नुयात् ३० इदमादित्यहृदयं यो धीते सततं नरः सर्वपाप
विशुद्धात्मा सूर्यलोके महीयते ३१ नास्त्यादित्यसमो देवो ना
स्त्यादित्यसमा गतिः प्रत्यक्षो भगवान् विष्णुर्येन विश्वं प्रतिष्ठि
तं ३२ नवतियोजनं लक्षं सहस्राणि शतानि च यावत् घटिका
मात्रेण तावच्चरति भास्करः ३३ गवां शतसहस्रस्य सम्य
क् दत्तस्य यत्फलं तत्फलं लभते विद्वान् शुद्धात्मा स्तौति
यो रविं ३४ यो धीते सूर्यहृदयं सकलं सफलं भवेत् अ
कं नवाप्नुयात्

ष्टानां ब्राह्मणानां च लिखित्वा यः संप्रयेत् ३५ ब्रह्म
लोके ऋषीणां च जायते मानुषोऽपि वा जातिस्मरत्वमाप्नो
ति शुद्धात्मानां न संशयः ३६ अजाय लोकत्रयपावनाय
भूतात्मने गोपतये वृषाय सूर्याय सर्वप्रलयान्तकाय नमो
महाकारुणिकोत्तमाय ३७ विवस्वते ज्ञानभृदन्तरात्मने दं
जगत्प्रदीपाय जगद्धितैषिणे स्वयंभुवे दीप्तसहस्रचक्षु
षे सुरोत्तमाय। अमिततेजसे नमः ३८ सुरैरनेकैः परिसेविता
य हिरण्यगर्भाय हिरण्मयाय महात्मने मोक्षपदाय नित्यं
नमोऽस्तु ते वासरकारणाय ३९ आदित्यस्त्वार्चितो देवो
आदित्यः परमं पदं आदित्यो मा [illegible] भूत्वा आदित्यो या अ
त्का

 त्रैगुण्यंचत्रिवेदाश्चत्रयोलोकास्त्रयाग्नयः त्रयाणां त्वंत्रयीमूर्तिस्तुरीयस्त्वंनमोस्तुते·२
ग

१४ मयंजगत् ४० आदित्यंपश्यतेभक्त्या मांपश्यतिध्रुवंनरः
स नादित्यंपश्यतेभक्त्यानपश्यतिमांनरः ४१ त्रिगुणंचत्रित १४
त्त्वंचत्रयोदेवास्त्रयोग्नयः त्रयाणांचत्रिमूर्तिस्त्वंतुरीयंच
नमोस्तुते ४२ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थि
तिनाशहेतवेत्रयीमयायत्रिगुणात्मधारिणेविरंचीनाराय
णशंकरात्मने ४३ नमोनमस्तेजगदेकसाक्षिणेःकृतादिमं
त्रैनियमादिहेतवेसरोजसंभूतसरोजनाथसरोजतोधारय
मुख्यमूर्तये ४४ यस्योदयेनेहजगत्प्रबुध्यतेप्रवर्ततेचाखि
लकर्मसिद्धये ब्रह्मेंद्रनारायणरुद्रवंदितःसनःसदायच्छ
तुमंगलंरवि·४५ नमोस्तुसूर्यायसहस्ररश्मयेसहस्र
शाखान्वितसंभवात्मनेसहस्रयोगोद्भवभावभागिने